# आदर्श प्रश्नपत्रम्

# विषय : संस्कृतम्

**कक्षा - द्वादशी** रोल नं०

समयः - होरात्रयम् ] [ पूर्णाङ्काः – 80

---

- **सामान्यनिर्देशाः :–**

I. प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि ।

II. प्रश्नसंख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया।

III. श्रेष्ठाङ्कान् प्राप्तये सुस्पष्टः लेखः लेखनीयः।

- **अस्मिन् प्रश्नपत्रे पञ्च खण्डाः सन्ति :–**

| | | |
|---|---|---|
| खण्डः 'क' | अपठित-अवबोधनम् | - 6 अङ्काः |
| खण्डः 'ख' | रचनात्मक-कार्यम् | - 15 अङ्काः |
| खण्डः 'ग' | पठित-अवबोधनम् | - 29 अङ्काः |
| खण्डः 'घ' | अनुप्रयुक्त-व्याकरणम् | - 06 अङ्काः |
| खण्डः 'ङ' | पाठाधारिताः बहुविकल्पीयाः प्रश्नाः | - 24 अङ्काः |

## खण्डः ‘क’

## अपठित-अवबोधनम्

1. अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि पूर्णवाक्येन संस्कृतेन लिखत –

( केवलं प्रश्नत्रयम् ) 3x2 = 6

संस्कृतभाषायाः वैज्ञानिकतां विचार्य एव सङ्गणकविशेषज्ञाः कथयन्ति यत् संस्कृतमेव सङ्गणकस्य कृते सर्वोत्तमा भाषा विद्यते। अस्याः वाङ्मयं वेदैः पुराणैः नीतिशास्त्रैः चिकित्साशास्त्रादिभिश्च समृद्धमस्ति। कालिदासदृशानां विश्वकवीनां काव्यसौन्दर्यम् अनुपमम्। चाणक्यरचितम् अर्थशास्त्रं जगति प्रसिद्धमस्ति। गणितशास्त्रे शून्यस्य प्रतिपादनं सर्वप्रथमं भास्कराचार्यः सिद्धान्तशिरोमणौ अकरोत्। चिकित्साशास्त्रे चरकसुश्रुतयोः योगदानं विश्वप्रसिद्धम्।

संस्कृते यानि अन्यानि शास्त्राणि विद्यन्ते तेषु खगोलविज्ञानं वास्तुशास्त्रं रसायनशास्त्रं ज्योतिषशास्त्रं विमानशास्त्रं च उल्लेखनीयम्।

**प्रश्नाः :-**

(क) सङ्गणकस्य कृते सर्वोत्तमा भाषा का विद्यते?

(ख) कालिदाससदृशानां विश्वकवीनां किम् अनुपमम्?

(ग) शून्यस्य प्रतिपादनं कः अकरोत्?

(घ) चिकित्साशास्त्रे कयोः योगदानं विश्वप्रसिद्धम्?

(ङ) चाणक्यरचितं किं जगति प्रसिद्धम् अस्ति?

## खण्डः 'ख'

## रचनात्मक-कार्यम्

2. अधोलिखितेषु निबन्धेषु एकमधिकृत्य पञ्चवाक्यानि संस्कृतभाषया लिखत - 1×5 = 5

(क) संस्कृतभाषायाः महत्त्वम्

(ख) समयस्य सदुपयोगः

(ग) प्रातःकालीनभ्रमणम्

(घ) अनुशासनम्

### (छन्द-अलङ्कार-परिचयः)

3. अधोलिखितेषु छन्देषु कस्यापि एकस्य लक्षणोदाहरणं संस्कृतभाषया लिखत - 1×5 = 5

(क) इन्द्रवज्रा

(ख) उपेन्द्रवज्रा

(ग) वंशस्थम्

4. अधोलिखितेषु अलङ्कारेषु कस्यापि एकस्य लक्षणोदाहरणं संस्कृतभाषया लिखत - 1×5 = 5

(क) अनुप्रासः

(ख) यमकः

(ग) उपमा

## खण्डः 'ग'

## पठित-अवबोधनम्

5. अधोलिखितपद्यांशस्य हिन्दीभाषया सप्रसङ्गसरलार्थं लिखत - 1×4 = 4

ईशावास्यमिदं सर्वं यत्किञ्च जगत्यां जगत् ।
तेन त्यक्तेन भुञ्जीथाः मा गृधः कस्यस्विद्धनम् ॥

**अथवा**

सहसा विदधीत न क्रियामविवेकः परमापदां पदम् ।
वृणुते हि विमृश्यकारिणं गुणलुब्धाः स्वयमेव सम्पदः ॥

6. अधोलिखितगद्यांशस्य हिन्दीभाषया सप्रसङ्गसरलार्थं लिखत- 1×4 = 4

गतस्य वर्षत्रयस्य आकलनात् ज्ञायते यद्विभागस्य कार्यनैपुण्यं दशगुणैः वर्धितम् । खाद्ये अपमिश्रणं न्यूनीभूतम् । अतः उपभोक्तृणामपि अभियोगो नास्ति विभागस्य विपक्षे । मन्त्रिणां मध्येऽपि तस्य सुख्यातिः वर्तते ।

**अथवा**

तस्मै राज्ञे व्ययार्थं रत्नचतुष्टयं दास्यामि एतेषां महात्म्यम् एकं रत्नं यद्वस्तु स्मर्यते तद्ददाति । भोजनादिकममृततुल्यमुत्पद्यते। तृतीयरत्नाच्चतुरङ्गबलं भवति । चतुर्थरत्नाद्दिव्याभरणानि जायन्ते ।

7. अधोलिखितासु सूक्तिषु मात्रद्वयोः सूक्त्योः भावार्थं हिन्दीभाषया लिखत- 2 x 2 = 4

(क) दातव्यं भोक्तव्यं धनविषये सञ्चयो न कर्तव्यः ।

(ख) योगः कर्मसु कौशलम् ।

(ग) सुलभसौख्यमिदं बालत्वं भवति।

(घ) उपार्जितानां वित्तानां त्याग एव हि रक्षणम्।

**अथवा**

अधोलिखितश्लोकस्य अन्वयं मञ्जूषातः उचितपदानि चित्वा पूरयत - 4×1 = 4

अस्ति यद्यपि सर्वत्र नीरं नीरज-राजितम् ।
रमते न मरालस्य मानसं मानसं विना ।

**अन्वयः :-** यद्यपि (1) .................... नीरजराजितं (2) .................... अस्ति, परन्तु (3) .................... मानसं (4) .................... विना न रमते ।

**मञ्जूषा**

| |
|---|
| नीरम् , सर्वत्र, मानसं, मरालस्य |

8. अधोलिखितं श्लोकं पठित्वा प्रश्नानाम् उत्तराणि श्लोकात् चित्वा संस्कृतभाषया पूर्णवाक्येन लिखत-

(केवलं प्रश्नत्रयम्) 3x1=3

कर्मणैव संसिद्धिमास्थिता जनकादयः ।
लोकसंग्रहमेवापि सम्पश्यन् कर्तुमर्हसि ॥

**प्रश्नाः :-**

(क) जनकादायः केन संसिद्धिम् आस्थिताः?

(ख) 'कर्तुम्' इत्यत्र कः प्रत्ययः?

(ग) के सम्पश्यन् कर्तुम् अर्हसि?

(घ) 'अर्हसि' इत्यत्रः कः लकारः अस्ति?

9. अधोलिखितं गद्याशं पठित्वा प्रश्नानाम् उत्तराणि गद्यांशात् चित्वा संस्कृतभाषया पूर्णवाक्येन लिखत -

(केवलं प्रश्नत्रयम्) 3x1=3

यौवनारम्भे च प्रायः शास्त्रजलप्रक्षालननिर्मलापि कालुष्यमुपयाति बुद्धिः। नाशयति च पुरुषमत्यासङ्गो विषयेषु ।

**प्रश्नाः :-**

(क) कः पुरुषं नाशयति?

(ख) 'विषयेषु' अत्र का विभक्तिः?

(ग) 'उपयाति' अत्र कः लकारः?

(घ) कदा बुद्धिः कालुष्यमुपयाति?

10. कोष्ठकाद् उपयुक्तशब्दं चित्वा स्थूलपदानि आधृत्य प्रश्ननिर्माणं कुरुत –

(केवलं प्रश्नत्रयम्) 3x1=3

(क) **चतुर्णां** परस्परं विवादो लग्नः। (कस्मिन/केषां)

(ख) पापान्निवारयति योजयते **हिताय** । (कस्मै/कस्मात्)

(ग) राजा **सिंहासने** समुपवेष्टुं गच्छति ।　　　(कुत्र/कस्य)

(घ) **शब्दैः** प्रतीयते यद् गृहे चौरः प्रविष्टोऽस्ति ।　(कैः/केभ्यः)

(ङ) विशेषेण तु **राज्ञाम्** ।　　　(केषाम्/कुत्र)

**(संस्कृत-साहित्य-परिचयः)**

11. अधोलिखितासु रचानासु एकस्याः संक्षिप्तपरिचयं हिन्दीभाषया लिखत -　　1×4 = 4

(क) उत्तररामचरितम्

(ख) कादम्बरी

(ग) श्रीमद्भगवद्गीता

12. अधोलिखितेषु लेखकेषु एकस्य संक्षिप्तपरिचयं हिन्दीभाषया लिखत -　　1×4 = 4

(क) अम्बिकादत्तव्यासः

(ख) बाणभट्टः

(ग) भवभूतिः

## खण्डः – 'घ'

## अनुप्रयुक्त-व्याकरणम्

13. यण्-सन्धेः अथवा वृद्धिसन्धेः परिभाषां सोदाहरणं हिन्दीभाषया लिखत ।　　1x2=2

14. कर्मधारयसमासस्य अथवा बहुव्रीहिसमासस्य परिभाषां सोदाहरणं हिन्दीभाषया लिखत। 1x2=2

15. सम्प्रदानकारकस्य अथवा करणकारकस्य परिभाषां सोदाहरणं हिन्दीभाषया लिखत।　1×2=2

## खण्डः – 'ङ'

## पाठाधारिताः बहुविकल्पीयाः प्रश्नाः

16. अधोनिर्दिष्टेषु प्रश्नेषु प्रदत्तवैकल्पिकचतुर्भ्यः उत्तरेभ्यः एकं शुद्धम् उत्तरं चित्वा लिखत -

24 x 1 = 24

1) 'महान्धकारः' इति पदे विग्रहोऽस्ति?

(i) महा अन्धकारः　　　(ii) महान् अन्धकारः

(iii) महान् एव अन्धकारः　　　(iv) महद् अन्धकारः

2) 'गुरूपदेशः' अत्र कः समासः?

(i) अव्ययीभावः　　　(ii) बहुव्रीहिः

(iii) तत्पुरुषः (iv) द्वन्द्वः

3) 'प्रकृत्या सिद्धम्' इति विग्रहे किं समस्तपदम्?

(i) प्रकृत्यासिद्धम् (ii) प्रकृतिसिद्धम्

(iii) प्रकृतीसिद्धम् (iv) प्रकृत्सिद्धम्

4) 'स्थितः' इत्यस्मिन् पदे कः प्रत्ययः?

(i) तः (ii) क्त

(iii) शानच् (iv) मयट्

5) 'जन+तल्' एतेषु संयोगे किं रूपं भवति?

(i) जनता (ii) जनतल्

(iii) जनतै (iv) जनते

6) 'दीर्घग्रीवः' अत्र विग्रहपदं किं भविष्यति?

(i) दीर्घा ग्रीवा यस्य सः (ii) ग्रीवः दीर्घः यस्य सः

(iii) दीर्घ ग्रीव यस्य सः (iv) दीर्घे दीर्घ ग्रीवे यस्य सः

7) 'कर्मणः' इत्यस्मिन् शब्दे का विभक्तिः?

(i) चतुर्थी (ii) द्वितीया

(iii) षष्ठी (iv) सप्तमी

8) 'पठति' इत्यत्र कः लकारः?

(i) लट् लकारः (ii) लोट् लकारः

(iii) लुट् लकारः (iv) लङ् लकारः

9) 'कोविदः' इत्यस्य शब्दस्य पर्यायपदं किम्?

(i) विद्वान् (ii) मूर्खः

(iii) कालिदासः (iv) अपण्डितः

10) 'धैर्यशालिनः' इत्यस्य शब्दस्य पर्यायपदं किम्?

(i) मनुष्याः (ii) प्रज्ञाः

(iii) लोकः (iv) धीराः

11) 'कर्मणैव' इति पदे कः संधिः?

(i) वृद्धिसन्धिः (ii) गुणसन्धिः

(iii) अयादिसन्धिः (iv) पररूपसन्धिः

12) 'भयम्' शब्दस्य विलोमपदमस्ति?

(i) सभयम्　　(ii) निर्भयम्

(iii) भयभीतः　　(iv) नास्ति कोऽपि

13) 'खादित्वा' इत्यत्र कः प्रत्ययो विद्यते?

(i) कत्वा　　(ii) क्त्वा

(iii) तुमुन्　　(iv) क्त

14) 'तस्यैव' इत्यस्य शब्दस्य कः सन्धिच्छेदः?

(i) तस्य + इव　　(ii) तस्य + एव

(iii) तस्य + ऐव　　(iv) तस्यैव

15) 'जनयेत् + अज्ञानाम्' इत्यत्र किं सन्धिपदम्?

(i) जनयेज्ञानाम्　　(ii) जनयेतज्ञानाम्

(iii) जनयेज्ञानाम्　　(iv) जनयेदज्ञानाम्

16) 'शुभम्' इत्यस्य शब्दस्य विलोमपदं किम्?

(i) मालिकः　　(ii) दुर्लभम्

(ii) अशुभम्　　(iv) नरो

17) 'प्रत्युत्तरम्' इति पदे कः सन्धिः?

(i) गुणसन्धिः　　(ii) यण् सन्धिः

(iii) अयादिसन्धिः　　(iv) वृद्धिसन्धिः

18) 'महोत्साहः' इत्यस्मिन शब्दे कः समासः?

(i) तत्पुरुषः　　(ii) कर्मधारयः

(iii) बहुव्रीहिः　　(iv) द्वन्द्वः

19) 'पठिष्यति' इत्यस्मिन् शब्दे कः लकारः?

(i) लोट् लकारः　　(ii) लङ् लकारः

(iii) लट् लकारः　　(iv) लृट् लकारः

20) 'जनस्य' इत्यस्मिन् शब्दे का विभक्तिः?

(i) प्रथमा　　(ii) षष्ठी

(iii) पञ्चमी　　(iv) सप्तमी

21) 'जगत्' इत्यस्य शब्दस्य पर्यायपदं किम्?

(i) ग्रसनम्　　(ii) संसारः

(iii) मालिकः　　(iv) निर्भयम्

22) 'हस् + क्त्वा' इत्यत्र किं रूपम्?

(i) हसित्वा
(ii) हस्वा
(iii) हत्वा
(iv) हस्कित्वा

23) 'लेखिष्यति' इत्यत्र कः लकारः?

(i) लृट् लकारः
(ii) लोट् लकारः
(iii) लुट् लकारः
(iv) लङ् लकारः

24) 'तिष्ठति' इत्यस्मिन् शब्दे कः लकारः?

(i) लोट् लकारः
(ii) लङ् लकारः
(iii) लट् लकारः
(iv) लृट् लकारः